काव्यमाला. २८.

श्रीसुभटकविप्रणीतं

दूताङ्गदम् ।

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना महामहोपाध्याय-
पण्डितदुर्गाप्रसादेन, मुम्बापुरवासिना परबोपाह्व-.
पाण्डुरङ्गात्मजकाशिनाथशर्मणा च
संशोधितम् ।

द्वितीयं संस्करणम् ।

तच्च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतम् ।

१९००

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपते-
रेवाधिकारः ।)

मूल्यं २ आणकाः ।

काव्यमाला।

महाकविश्रीसुभटकृतं

दूताङ्गदम्।

पायात्स वः कुमुदकुन्दमृणालगौरः
शङ्खो हरेः करतलाम्बरपूर्णचन्द्रः।
नादेन यस्य सुरशत्रुविलासिनीनां
काञ्च्यो भवन्ति शिथिला जघनस्थलीषु ॥ १ ॥

अपि च।

शंभोः कोदण्डभङ्गादविदितविभवः शक्रसूनोर्विनाशा-
दज्ञातः सेतुबन्धादपि न परिचितः कैकसीनन्दनेन।
संवादादङ्गदस्याप्यनधिगतगतिः कारणान्मर्त्यमूर्तेः
भूयाद्भूत्यै जनाना जगति रघुपतेर्वैष्णवः कोऽपि भावः ॥ २ ॥

(नान्द्यन्ते)

सूत्रधारः—(परिक्रम्य नेपथ्याभिमुखमवलोक्य।) प्रिये विलासवति, इतस्तावत्।

---

१. अय सुभटकविरत्र कुमारपालदेव वर्णयति. स च कुमारपाल १०८८ मितात्खिस्तसंवत्सरादारभ्य ११७२ मितसंवत्सरपर्यन्त गुर्जर (गुजरात) देश पालयामास. श्वेताम्बरजैनोऽनेकग्रन्थकर्ता पण्डितवरः श्रीहेमाचार्योऽपि कुमारपालसमकालीन एव. (मुम्बई-मुद्रितसुभाषितावलीपुस्तकोपोद्घातस्य १३९ पृष्ठ विलोकनीयम्) हेमाचार्यकृत कुमारपालचरित प्राकृतनिबद्ध प्रसिद्धमेव. 'सुभटेन पदन्यासः स कोऽपि समितौ कृतः। येनाधुनापि धीराणा रोमाञ्चो नापचीयते ॥' इति कीर्तिकौमुद्यां (१।२४) खिस्तसंवत्सरत्रयोदशशतकपूर्वभागसमुत्पन्नः सोमेश्वरदेवोऽपि सुभटकवि स्तौति. अस्मिन्ग्रथे न सर्वे श्लोकाः सुभटकृताः, किं तु भवभूतिराजशेखरादिकृता अपि श्लोका अत्र वर्तन्ते. परकीयश्लोकग्रहण च कविरेव स्वय ग्रन्थान्ते स्वीकरोति 'पायात्स वः—' इत्यादि प्रथमश्लोकस्योत्तरार्धं काव्यालंकारटीकाया (२।८) नमिसाधुनोद्धृतः. २. वालिनः. ३. कैकसी रावणादीनां माता. 'नैकषी' इति पुस्तकान्तरपाठः.

(प्रविश्य

नटी—अज्जउत्त, इअम्हि । आणवेदु अज्जो ज करणिज्जम् । (क)

सूत्रधारः—विश्वविश्वंभराभारसमुद्धरणादिवराहस्य निजभुजयुगलविदलितसकलवैरिवृन्दसुन्दरीनेत्रनीलोत्पलविगलितबहलबाष्पपूरप्लवमानप्रतापराजहंसस्य महाराजाधिराजश्रीमत्त्रिभुवनपालदेवस्य परिषदाज्ञया प्रबन्धविशेषमहमुपक्रमाणोऽस्मि । भो भोः सामाजिकाः, शृणुत सावधानाः यदद्य वसन्तोत्सवे देवश्रीकुमारपालदेवस्य यात्रायां पदवाक्यप्रमाणपारंगतेन महाकविना श्रीसुभटेन विनिर्मितं दूताङ्गदं नाम च्छायानाटकमभिनेतव्यम् ।

नटी—अज्जउत्त, जुत्तं ववसिदम् । (ख)

(नेपथ्ये)

तारापतौ वानरराजलक्ष्मीं निहत्य यो वालिनमानिनाय ।
तीर्णार्णवो दाशरथिः स देवः सुवेलशैलोपवनेष्वखेलत् ॥ ३ ॥

सूत्रधारः—आर्ये, प्रारब्धमेव कुशीलवैः । यदमी रामानुचरवीराणां परस्परमालापाः श्रूयन्ते । तदेहि । आवामप्यनन्तरकरणीयाय सज्जीभवावः ।

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

(ततः प्रविशतः सुवेलशैलशिलातलासीनौ रामलक्ष्मणौ । सुग्रीवादिकश्च विभवतः परिवारः ।)

रामः—(लक्ष्मण प्रति ।) वत्स लक्ष्मण,

(क) आर्यपुत्र, इयमस्मि । आज्ञापयत्वार्यो यत्करणीयम् ।

(ख) आर्यपुत्र, युक्तं व्यवसितम् ।

---

१. 'युगलार्गलाविदलित' इति पाठः. २. 'देव' इति पद पुस्तकान्तरे नास्ति. ३. 'पदवाक्यपारंगमेन' इति पाठः. ४. सुग्रीवे. ५. 'खेलेत्' इति पाठः. ६. 'नर्तकैः' इति पाठः. ७. 'इहैव रामानुचराणां परस्परालापा.' इति पाठः. ८. 'सुग्रीवादिपरिवारश्च' इति पाठः. ९. 'रामः—(लक्ष्मणमवलोक्य ।) तीर्णोऽर्णवः—' इति पाठः.

तीर्णोऽर्णवः कर्वा[1] कृतेव[2] कपीश्वरस्य
सेनाभटैर्झटिति[3] राक्षसराजधानी ।
यत्पौरुषोचितमिहाद्य[4] कृतं मया न-
दैवस्य वश्यमपरं धनुषोऽथवास्य ॥ ४ ॥

लक्ष्मणः—आर्य, कातरजनमनोवलम्बिना दैवेन किम् ।

उद्योगिन[5] पुरुषसिंहमुपैति लक्ष्मी-
दैवं हि दैवमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ ५ ॥

अपि च ।

यावल्ललाटशिखरं भ्रुकुटिर्न याति
यावन्न कार्मुकशिखामधिरोहति ज्या ।
तावन्निशाचरपतेः पटिमानमेतु
त्रैलोक्यमूलविभुजेषु भुजेषु दर्पः ॥ ६ ॥

तदादिश्यतामङ्गदाय दौत्यम् ।

रामः—(अङ्गद सबहुमानमालोक्य[6] ।) वत्स,

पिता ते यद्बाली बलिनि दशकण्ठे कलितवा-
न्[7] तद्वक्तुं शक्ता वयमयमुदास्ते न पुलकः ।
स एव[8] त्वं व्यावर्तयसि तनुजत्वेन पितृतां
ततः किं वक्तव्यं तिलकय निसृष्टार्थपदवीम् ॥ ७ ॥

अङ्गदः—(मौलिमण्डलमिलत्करयुगलेन प्रणम्य विज्ञापयति ।) देव,

किं[9] प्राकारविहारतोरणवतीं लङ्कामिहैवानये
किं वा सैन्यमहं द्रुतं रघुपतेस्तत्रैव संपादये ।

---

१. सुग्रीवस्येत्यर्थः. २. 'इहाङ्कुरित मयाद्य' इति पाठः. ३ अयं श्लोकः पुस्तकान्तरे नास्ति. प्रसिद्धश्च हितोपदेशादिषु. ४. 'आलोक्य समादिशति ।) महावीर अङ्गद' इति पाठः. ५. 'न शक्तास्तद्वक्तुम्' इति पाठः. ६. 'एष' इति पाठः. ७. निसृष्टार्थो दूतविशेष इत्यर्थः ८. अस्माच्छ्लोकादारभ्याग्रिमाङ्गदोक्तिपर्यन्तं पुस्तकान्तरे नास्ति.

आकल्पं कुलपर्वतैरविरलैर्बध्नामि वा सागरं
देवादेशय किं करोमि सकलं दोर्दण्डसाध्यं मम ॥ ८ ॥

रामः[1]—वत्स,

अज्ञानादथवाधिपत्यरभसादस्मत्परोक्षे हृता[2]
सीतेयं प्रविमुच्यतामिति वचो गत्वा दशास्यं वद ।
नो चेल्लक्ष्मणमुक्तमार्गणगणच्छेदोच्छलच्छोणित-
च्छत्रच्छन्नदिगन्तमन्तकपुरं पुत्रैर्वृतो यास्यसि ॥ ९ ॥

अङ्गदः—देव,

संधौ वा विग्रहे वापि मयि दूते दशाननी ।
अक्षता मा क्षता वापि क्षितिपीठे लुठिष्यति ॥ १० ॥

रामः[3]—साधु भो वालिनन्दन, साधु । (इति पृष्ठे हस्तं दत्त्वा विसर्जयति[4] ।)

(अङ्गद प्रणम्य निष्क्रान्तः ।)

सुग्रीवः—(लङ्काशैलशिखरमालोक्य ।) देव, पश्य पश्य ।

सावज्ञमिव संपश्यन्कपिवीरवरूथिनीम् ।
निजांसे दशकण्ठोऽयं दत्ते मत्तेभवद्दृशम् ॥ ११ ॥

तदागच्छत । वयमपि सुवेलशैलवनतिलकितानि जलनिधेस्तटानि पश्यामः ।

(इति निष्क्रान्ताः ।)

(ततः प्रविशति रावणो मन्दोदरी विभीषणादिकश्च परिवारः ।)

रावणः—(विभीषणं प्रति ।) वत्स विभीषण,

एते[5] ते मम बाहवः सुरपतेर्दोर्दण्डकण्डूहराः
सोऽहं सर्वजगत्पराभवकरो लङ्केश्वरो रावणः ।

---

१. 'रामः प्राह' इति पाठः. २. अय श्लोक· क्षेमेन्द्रेण सुवृत्ततिलके भवभूतिनाम्नोदाहृतः. तत्र च द्वितीयचरणे 'सीतेय प्रविमुच्यतां शठ मरुत्पुत्रस्य हस्तेऽधुना' इति पाठोऽस्ति. ३. 'साधु अङ्गद, साधु वालिनन्दन' इति पाठ·. ४. 'विसर्जयति' इति पाठः. ५. 'एते ते' इत्यादि श्लोकद्वय पुस्तकान्तरे नास्ति.

सेतोर्बन्धमिमं शृणोमि काप्येभिः पश्यामि लङ्कां वृतां
जीवद्भिस्तु न दृश्यते किमथवा किं वा नहि श्रूयते ॥ १२ ॥

अपि च ।

जम्भारातीभकुम्भस्थलदलनपटुश्चन्द्रहासाभिधानः
खड्गः किं तापसस्य श्रवणविषयतां न प्रयातो मदीयः ।
यन्नासौ मेघनादप्रभृतिभटशतैर्व्यावृतां वेत्ति लङ्कां
तन्नूनं सत्यमेतत्प्रचलति हि मतिः प्राप्तकालस्य जन्तोः ॥ १३ ॥

यदाखण्डलदर्पेन्दुराहवो बाहवो मम ।
द्रुह्यन्ति तापसेभ्योऽपि तदरिष्टमहो महत् ॥ १४ ॥

मन्दोदरी—(खगतम् ।)

तं जेव्व अज्ज वि गले गरलं गव्वस्स वरिसए एस ।
जग्गन्ति जेण रक्खसकुलम्मि सोअङ्कुरकुडप्पा ॥ १५ ॥

(प्रकाशम् ।) णाह, पेक्ख पेक्ख । अच्चरिअं अच्चरिअम् ।

विलसिदसरोसवानरवरूहिणीकलअलस्स कल्लोला ।
इह तुह विलासवासम्मि वीर विरअन्ति पडिसद्दम् ॥१६॥ (क)

रावणः—(सावज्ञम् ।) देवि प्रकृतिप्रियवादिनि, अलमलमनया मर्कट-कीटकोलाहलविभीषिकया । किमप्यपरं वक्तुकामासि ।

मन्दोदरी—

अज्ज वि ण कोवि दोसो रहुपहुणो देव देहि वैदेहीम् ।
मन्दोदरीअ मण्डणमखण्डभावं समब्भेदु ॥ १७ ॥ (ख)

(क) तमेवाद्यापि गले गरलं गर्वस्य वर्षत्येषः ।
जाग्रति येन राक्षसकुले शोकाङ्कुरकुज्वलाः ॥

नाथ, प्रेक्षस्व प्रेक्षस्व । आश्चर्यमाश्चर्यम् ।

विलसन्सरोषवानरवरूथिनीकलकलस्य कल्लोलाः ।
इह तव विलासवासे वीर विरचयन्ति प्रतिशब्दम् ॥

(ख) अद्यापि न कोऽपि दोषो रघुप्रभोर्दैव देहि वैदेहीम् ।
मन्दोदर्या मण्डनमखण्डभावं समभ्येतु ॥

---

१ 'प्रकृति' इति पुस्तकान्तरे नास्ति. २. 'कटककोलाहलबिभीषया' इति पाठः.

रावणः—(सकोपहासम् ।) देवी,

एकं तावदकृत्यमेतदतुलं यन्मैथिलीयं हृता
द्वैतीयीकमिदं विमृश्य यदसौ तस्मै तदा नार्पिता ।
तार्तीयीकमिदं तु यत्कपिभटैर्बद्धेऽद्य वारां निधौ
संधानं दशकंधरो रचयति क्ष्मानन्दिनीमर्पयन् ॥ १८ ॥

तदवतंसयतु भवती विलासगृहम् । (इति मन्दोदरी भाष्प विसृजन्ती निष्क्रान्ता ।)

रावणः—(विभीषण प्रति ।) वत्स विभीषण, तवापि किमपि वक्तव्यमस्ति ।

विभीषणः—देव लङ्केश्वर, विचारय नयचक्षुषा ।

मनुष्यौ न मनुष्यौ तौ वानरास्ते न वानराः ।
व्याजेन किमपि च्छन्नं देव दुर्दैवमेव ते ॥ १९ ॥

तदियं मुच्यतां राक्षसकुलकालरात्रिर्जानकी ।

रावणः—(सरोष खड्गमादाय ।) आः पाप प्रतिपक्षपक्षपातिन् कुलाङ्गार दुराचार, एष ते चन्द्रहासेन शिरः पातयामि । (इति संरभते ।)

(विभीषणश्च सभयमपसरति ।)

माल्यवान्—(अन्तराले भवन् ।) देव लङ्केश्वर, विचारय नयचक्षुषा किमहितमभिहितं कुमारविभीषणेन ।

रावणः—भोः, त्वमपीदृशः संपन्नः ।

(माल्यवान्सभय तूष्णीमास्ते ।)

रावणः—(विभीषण प्रति ।) अरे बान्धवापसद[1], परिहर मे राजधानीम् । तमेव च वनेचरमनुप्रविश्य प्रकाशय नीतिनैपुण्यम् । न पुनः कथाशेषं करिष्यामि ।

विभीषणः—न भाव्यमन्यथा भवति । (इति वदन्निष्क्रान्तः ।)

(ततः प्रविशति प्रहस्ताभिधः प्रतीहारः ।)

प्रहस्तः—देव, रामस्य दूतोऽहमिति ब्रुवाणः कोऽपि शाखामृगो द्वारमध्यास्ते ।

रावणः—(सावज्ञम् ।) प्रवेशय तावत् ।

१. 'बान्धवाभास' इति पाठः.

(ततः प्रविशति प्रहस्तेन सहाङ्गदः ।)

अङ्गदः—(रावणमवलोक्य स्वगतम् ।)

स एष जगदास्कन्दकौतुकी दशकंधरः ।
गन्मौलिकमलारामे रामः क्षेप्ता शिलीमुखान् ॥ २० ॥

(प्रकाशम् ।)

रे राक्षसाः कथयत क्व स रावणाख्यो
रत्नं रवीन्दुकुलयोरपहृत्य नष्टः ।
त्रैलोक्यदीपनकरास्त्रशिखाकराले
यो रामनामदहने भविता पतङ्गः ॥ २१ ॥

(बहवो राक्षसा रावणरूप विभ्रति ।)

अङ्गदः—

रे रे रावण रावणाः कति बहूनेतान्वयं शुश्रुमः
प्रागेकं किल कार्तवीर्यनृपतेर्दोर्दण्डपिण्डीकृतम् ।
एकं नर्तनदापितान्नकवलं दैत्येन्द्रदासीजनै-
रेकं वक्तुमपि त्रपामह इति त्वं तेषु कोऽन्योऽथवा ॥ २२ ॥

रावणः—(बहुरूपाणि संहृत्य सहेलम् ।) भो भोः शाखामृग, कस्त्वं कस्यासि दूतः ।

अङ्गदः—

पितर्युपरते यस्तु नोद्वहेत्पैतृकीं धुराम् ।
तेन नैवोपदेष्टव्याः स्वस्य वंशस्य पूर्वजाः ॥ २३ ॥

तथापि भवतु ।

रक्षोदुर्भिक्षमाधातुमवतीर्णोऽस्ति यः क्षितौ ।
तस्य रामस्य दूतोऽहं सुतस्तस्य च वालिनः ॥ २४ ॥

अपि च ।

तस्य रामस्य दूतोऽहं येन मे जनको हतः ।
वालिनस्तस्य पुत्रोऽहं यद्वीर्यानुभवस्तव ॥ २५ ॥

---

१. 'सदने' इति पाठः.

रावणः—(अङ्गद प्रति ।)

रामः[1] किं कुरुते

अङ्गदः— न किंचित्

रावणः— अपि च प्राप्तः पयोधेस्तटं

कस्मात्सांप्रतम्

अङ्गदः— एवमेव हि

रावणः— ततो बद्धः किमम्भोनिधिः ।

अङ्गदः—

क्रीडाभिः

रावणः— किमसौ न वेत्ति पुरतो लङ्केश्वरो वर्तते

अङ्गदः—

जानात्येव विभीषणोऽस्य निकटे लङ्कापदे स्थापितः ॥ २६ ॥

रावणः—(साशङ्कम् ।) रामस्याधुना कीदृशी चर्या ।

अङ्गदः—

अङ्के कृत्वोत्तमाङ्गं प्लवगबलपतेः[2] पादमक्षस्य[3] हन्तुः

कृत्वोत्सङ्गे सलीलं त्वचि कनकमृगस्याङ्गमाधाय शेषम् ।

बाणं रक्षःकुलघ्न प्रगुणितमनुजेनादरात्तीक्ष्णमक्ष्णः

कोणेनोद्वीक्षमाणस्त्वदनुजवचने दत्तकर्णोऽयमास्ते ॥ २७ ॥

(रावणस्तत्रावज्ञा नाटयन्, प्रहस्तस्य कर्णे एवमेव कथयति ।)

प्रहस्तः—यदादिशति देवः । (इति निष्क्रान्तः ।)

(ततः प्रविशति प्रहस्तेन सह मायामैथिली ।)

मैथिली—जअदु जअदु अज्जउत्तः । (क) (इत्यभिदधाना रावणोत्सङ्गमारोहति ।)

रावणः—(स्वगतम् ।) साधु भो मायामपि साधु, जानासि दशकण्ठमाराधयितुम् ।

(क) जयतु जयत्वार्यपुत्रः ।

---

१. 'रामः किं कुरुते' इत्यादिरङ्गदरावणयोरुक्तिप्रयुक्तिरूपः श्लोकः. २. सुग्रीवस्य. ३. हनूमतः.

अङ्गदः—(सविषादमात्मगतम्) अपि नाम जानकी परायाङ्गनाचरितमाचरेत् । भवतु । विलोकयामि तावत् ।

रावणः—देवि विदेहनन्दिनि, प्रतिबोध्यतां रामप्रहितोऽयं शाखामृगः ।

मायामैथिली—(अङ्गदं सबहुमानमवलोक्य ।) वत्स अङ्गद, मह वयणेहि पडिबोधेहि राहवम्—

इम्मवर कीस खिज्जसि राहव तं वज णिअं णअरम् ।
दिण्णाहं णिजहिअए सक्खीकिय मयणमेअस्स ॥ २८ ॥

अवि अ ।

मयि रावणङ्कपङ्कजविलासहंसीइँ अज्ज रहुणाहो ।
रक्खसभटेहिँ भञ्जिदभरतं भूसेदु णिजरज्जम् ॥ २९ ॥ (क)

अङ्गदः—(कर्णौ पिधाय ।) न खलु भवती जानकी । यतः ।

अश्रुतपूर्वाविनया पर्याप्तालंकृता च शीलेन ।
सा राघवस्य पत्नी पुनाति भुवनानि गङ्गेव ॥ ३० ॥

(ततः प्रविश्य पटाक्षेपेण)

राक्षसी—

श्रुत्वा रघुपतेः किंचिदनिष्टं देवी[1] मैथिली ।
विधातुं सर्वदुःखान्तं लतापाशेन वाञ्छति ॥ ३१ ॥

रावणः—(सखेदम् ।) आः, किमेवमभिहितमनवसरे । राक्षसाः, रक्षत रक्षत जानकीम् । (इति मायामैथिलीं विसर्जयति ।)

अङ्गदः—(सहर्षम् ।) परमार्थमैथिलीमयेन तेजसा तिरस्कृतं मायामैथिलीमयमन्धकारम् ।

(क) वत्स अङ्गद, मद्वचनैः प्रतिबोधय राघवम्—

एषामुपरि कस्मात्खिद्यसे राघव तं व्रज निजं नगरम् ।
दत्ताहं निजहृदयेन साक्षीकृत्य मदनमेतस्य ॥

अपि च ।

मयि रावणाङ्कपङ्कजविलासहंस्यामद्य रघुनाथः ।
राक्षसभटैर्भञ्जितभरतं भूषयतु निजराज्यम् ॥

---

१. 'मैथिली स्वयम्' इति पाठः.

रावणः—भो वलीमुख, किमपि वक्तुकामः ।

अङ्गदः—

न दोषः खल्पोऽपि प्रभवति तवाकृत्यकरणा-
दपि क्रव्यादानां भवति परमं मण्डनमिव ।
अतः क्रव्यादेश त्वयि न परदारापहरणा-
दनौचित्यं किंचित्तदपि विषमाः क्षत्रियरुषः ॥ ३२ ॥

रावणः—(सक्रोधम् ।) आः पाप दुर्मुख, मौखर्यदर्शनेन राघवमर्घयसि न पुनर्निदर्शनेन ।

अङ्गदः—किमपरमुदाहरणं विलोकय ।

समं प्रतिज्ञया येन तीर्त्वा दुस्तरमर्णवम् ।
वनद्रुमाः सुवेलस्य भज्यन्ते त्वद्भुजा इव ॥ ३३ ॥

रावणः—अरे विचारमूढ,

पारावतैः किमयमम्बुनिधिर्न तीर्णः
क्रान्ताः कथं न कपिभिः क्व च नाम शैलाः ।
तद्वेद्मि दोर्बलमसौ यदि शौर्यरेखा-
माविष्करोति करवालकषोपलेऽद्य ॥ ३४ ॥

अपि च रे, रावणं न जानासि ।

आस्कन्धावधि कण्ठपीठविपिने प्राक्चन्द्रहासासिना
छेत्तुं प्रक्रमिते मयैव झटिति त्रुट्यच्छिरासंततौ ।
असेरं गलिताश्रु गद्गदपदं भुग्नं च यद्येष्वभू-
द्वक्त्रेष्वेकमपि स्वयं स भगवांस्तन्मे प्रमाणं शिवः ॥ ३५ ॥

अङ्गदः—

किं राघवस्य दशकंधरचन्द्रहास-
वंशेऽभवन्भुवनभीतिभिदः शरास्ते ।
लूनानि यैस्तव शिरांसि पुनः प्ररोह-
मेष्यन्ति मूढ नहि धूर्जटिपर्वणीव ॥ ३६ ॥

रावणः—(सक्रोध चन्द्रहासमादाय ।) रे अपसरापसर मेऽग्रतः, न पुनः कथाशेषं करिष्यामि ।

अङ्गदः—(गन्तुमिच्छन् ।)

रे नक्तंचरराज मुञ्च सहसा देवीमिमां मैथिलीं
मिथ्या किं निजपौरुषस्य नटनप्रागल्भ्यमभ्यस्यसि ।
एतां पश्यसि किं न किंनरगणैरुद्गीतदोर्विक्रमां
सेनां वानरभर्तुरुद्भटभुजस्तम्भाग्रभीमां पुरः ॥ ३७ ॥

अपि च ।

शिरोभिर्मा देवीः शिव इव न ते दास्यति पुनः
प्रबन्धं पश्याब्धेः सरस इव कैलाससुभट ।
हितं तु त्वां ब्रूमो मम जनकदोर्दण्डविजये
चलत्कीर्तिस्तम्भ त्यज कमलबन्धोः कुलवधूम् ॥ ३८ ॥

किं च ।

आदौ येन सुबाहुमुख्यपिशिताहारैः समं ताडका
नीता नाशमतश्च भग्नवदनश्रीस्ते स्वसाकारि च ।
हत्वा येन वने भवद्भटवटून्बद्धोऽम्बुधिश्च क्षणा-
त्कर्ता त्वन्निधनस्य सैष समरे भ्रान्तिस्तवाद्यापि का ॥ ३९ ॥

अपि च ।

रे रे राक्षस मा स्म शंकरवरभ्रान्त्या विभाङ्क्षीर्तयं
रुष्टो मूढ तदैव यन्मतिरभूत्सीतापहारे हरः ।
नो चेदिष्टकपालमण्डनभृताप्याखण्ड्य मुण्डावलीं
भक्त्या ढौकितमीश्वरेण किमहो[1] प्रत्यर्पितं प्राभृतम् ॥ ४० ॥

अपि च । जानीमहे महेश्वरपरिचरणप्रसङ्गपरमार्थमपि भवतः । मिथ्याभिमानिन्,

आः पौलस्त्य किमेवमुत्पुलकितः स्वस्मै मुहुः श्लाघसे
यत्तोषं गमितः स्वमौलिकमलैर्बालेन्दुमौलिर्मया ।

---

१. 'तव किम्' इति पाठः.

प्राचीनं हि विरञ्चिपञ्चमशिरश्छेदापवादं स्मर-
न्देवोऽदत्त वरं तवापि कृपया कायव्रतं कुर्वतः ॥ ४१ ॥

शृणु रे दशवदन, वदनविवरविनिर्गतवाग्विभीषिकया न विभीमो वयम् ।
(इत्यभिधाय निष्क्रान्तोऽङ्गद. ।)

(नेपथ्ये ।)

त्वयि त्रिभुवनाधीशे हन्ति वानरवाहिनी ।
सज्जो भव महावीर वीरत्वं क्व गतं तव ॥ ४२ ॥

रावणः—(सौत्सुक्यम् ।) अये, अस्मदनुजीविनो वध्यमाना भृशं बुम्बायन्ते ।

(ततः प्रविशन्ति विक्षताङ्गा निशाचरभटाः ।)

निशाचराः—

वानरैर्यदि वध्याः स्मस्त्वयि नाथेऽप्यसांप्रतम् ।
त्वमपि प्राणिते बुद्धिं शाश्वतीं मा कृथा वृथा ॥ ४३ ॥

रावणः—(सकोपं प्रहस्त त्वरितमाहूय ।)

संनह्यतां सपदि राक्षसवीरसेना
के नाम रामहतकस्य वनौकसोऽमी ।
जागर्ति यन्मम भुजे ननु चन्द्रहासः
श्यामीकृतामरवधूमुखचन्द्रहासः ॥ ४४ ॥

(पुनर्विकट परिक्रमन् ।) अरावणमरामं वा जगदद्य भविष्यति । (इति वदन्निष्क्रान्तः ।)

(ततः प्रविशतो हेमाङ्गदचित्राङ्गदौ गगनवीथीसंचारिणौ गन्धर्वौ ।)

हेमाङ्गदः—सखे चित्राङ्गद,

दिव्यास्त्रैर्भूर्भुवःस्वस्त्रितयडमरकोड्डामरैर्योधयित्वा
लूनोत्क्षिप्तैः शिरोभिर्दशभिरधिनभो दर्शितैकादशार्कः ।
काकुत्स्थेनावकीर्णो निजविशिखशिखायोगपीठोपहूतो
ब्रह्मास्त्रेणाधिशेते रजनिचरपतेर्वीरशय्यां कबन्धः ॥ ४५ ॥

चित्राङ्गदः—सखे, अनया गगनवीथ्या वहोः कालात्संचरावहे निर्भयमेवम् ।

(नेपथ्ये कलकलः ।)

यद्वक्त्राणां दशानामिव दश ककुभः शासितुं सृष्टिरासी-
द्विंशत्यायश्च दोर्भिर्दशगुणितमिव प्राप्तवान्वीर्यवर्ष्म ।
लङ्केन्द्रः संजितेन्द्रः समरभुवि जवाज्जानकीवल्लभेन
ज्योतिर्दीप्रैः क्षुरप्रैः स खलु विरचितो निर्विवन्धः कवन्धः ॥ ४६ ॥

चारणः—शृणु हेमाङ्गद, चित्राङ्गद, चित्रमिवावलोकय ।

हेलाखण्डितचण्डहेमहरिणैर्वाणैः कुलं रक्षसां
शेषीभूतमपीषणं गुणनिधौ कृत्वापि रामे स्थिते ।
प्रत्युज्जीवितशङ्कया यमजितो लङ्कापतेः कातरै-
र्नो मुक्ताः कुसुमस्रजो न च सुरैरास्फालितो दुन्दुभिः ॥ ४७ ॥

चित्राङ्गदः—(सचमत्कारं हेमाङ्गदं प्रति ।) सखे हेमाङ्गद, ईदृगेवाद्भुत-रसैकभाजनं भवानीपतिभक्तिभासुरः प्रबलप्रतापभरप्रणमितसकलसुरासुरो वीरवीरोत्तंसः खल्वयं नक्तंचरचक्रवर्ती । यः किल पुरा पुरारिपरिचर्या-वसरे

बिभ्राणं दशवक्त्रतां क्रममिलत्पञ्चाननीपूजया
यः सर्वं स्वमिव स्वमीश्वरमिति ज्ञात्वा मुखैः पञ्चभिः ।
शंभोरेव शिरःसु तं निजकरं व्यापारयन्वारितः
पार्वत्याः कथमप्यहो न स दशग्रीवो गिरां गोचरः ॥ ४८ ॥

(कर्मप्राबल्यमीक्षमाणः । सखेदम् ।) सखे हेमाङ्गद, पश्य पश्य ।

इह खलु विषमः पुरातनानां भवति हि जन्तुषु कर्मणां विपाकः ।
हरशिरसि शिरांसि यानि रेजुः शिव शिव तानि लुठन्ति गृध्रपादैः ॥ ४९ ॥

हेमाङ्गदः—सखे, नातिचित्रमेतत् । 'यतो धर्मस्ततो जयः' इत्ययं सत्य एव शास्त्रप्रवादः । अतोऽस्मिन्नर्थे शरीरादिभिः पुण्यापुण्यकारिणामायति-र्दर्शिता । अत्र रावण एवोदाहरणमापद्यते । तथाहि ।

वपुर्मुख्यं वित्तं व्ययितमिह धर्मार्थमवनौ
खलु स्फारीभूतं वलति विपरीतं नहि पुनः ।
वलिं कुर्वञ्शंभोः पलभुजपतिः सत्रिभुवनां
शिरःश्रेणीं लेभे ननु विगमयन्नुत्पलकृते ॥ ९० ॥

(नेपथ्ये ।)

वाणैर्लोञ्छितकेतुयष्टिशिखरो मूर्छानमत्सारथि-
र्मांसास्वादनलुब्धगृध्रविहगश्रेणीभिरासेवितः ।
रक्षोनाथकवन्धगाढपतनक्षुण्णाक्षदण्डो हयै-
र्हेषित्वा स्मृतमन्दुरास्थितिहृतैर्लङ्कां रथो नीयते ॥ ९१ ॥

(पुनर्नेपथ्ये ।)

सर्वा गीर्वाणवध्वो व्रजत निजगृहान्बद्धमाधोरणं द्रा-
क्स्वर्गेभस्तम्भमालानय सुरकरिणं यामिका यात देवाः ।
भूयो दिव्यद्रुमाणां भवतु ननु वने नन्दने संनिवेशो
द्वारि क्षिप्तं यदैन्द्रे दशवदनशिरः किंकरैरङ्कितस्य(१) ॥ ९२ ॥

अपि च ।

रणरसिकसुरस्त्रीमुक्तमन्दारदामा
स्वयमयमवतीर्णो लक्ष्मणन्यस्तहस्तः ।
विरचितजयशब्दो बन्दिभिः स्यन्दनाङ्का-
दिनकरकुललक्ष्मीवल्लभो रामभद्रः ॥ ९३ ॥

रामः—(पुष्पकाधिरूढोऽयोध्यामागच्छन्सीता प्रति लङ्कारणभूमिं दर्शयन् ।)

अत्रासीत्फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं लम्भितः
केनाप्यत्र मृगाक्षि राक्षसपते कृत्ता च कण्ठाटवी ॥ ९४ ॥
इति नवरसगर्भैर्जानकीं प्रीणयन्वः
पुलकितललिताङ्गः पैतृकं प्राप्य धाम ।

सुखयतु कुलराज्यं पालयन्नुत्कपौरः
प्रकटितबहुभद्रः सर्वदा रामभद्रः ॥ ९९ ॥

स्वनिर्मितं किंचन गद्यपद्यबन्धं कियत्प्राक्तनसत्कवीन्द्रैः ।
प्रोक्तं गृहीत्वा प्रविरच्यते स्म रसाढ्यमेतत्सुभटेन नाट्यम् ॥ ९९ ॥

इति सुभटकविप्रणीतं दूताङ्गदं नाम च्छायानाटकं समाप्तम् ।

समाप्तोऽयं ग्रन्थः ।

दूताङ्कदस्थश्लोकानां सूची ।

	पृ०	श्लो०
अङ्के कृत्वोत्तमाङ्गं प्लवगबलप	८	२७
अज्ज वि ण कोवि दोसो ..	५	१७
अज्ञानादथवाधि ज्यरभसा ...	४	९
अत्रासीत्फणिपाशबन्धनविधि'	१४	५४
अश्रुतपूर्वाविनया पर्याप्ताल..	९	३०
आः पौलस्त्य किमेवमुत्पुलकि	११	४१
आदौ येन सुबाहुमुख्यपिशि...	११	३९
आस्कन्धावधि कण्ठपीठविपिने	१०	३५
इति नवरसगर्भिर्जानकीं प्री	१४	५५
इम्मवर किस खिज्जसि राह..	९	२८
इह खलु विषमः पुरातनानां भव	१३	४९
उद्योगिनं पुरुषसिंहमुपैति ..	३	५
एक तावदकृत्यमेतदतुल ..	६	१८
एते ते मम बाहव' सुरपते ...	४	१२
किं राघवस्य दशकवरचन्द्र ...	१०	३६
किं प्राकारविहारतोरणवतीं...	३	
जम्भारातीभकुम्भस्थलदलन	५	१३
तं जेव्व अज्ज वि गले गरल	५	१५
तस्य रामस्य दूतोऽहं येन ...	७	२५
तारापतौ वानरराजलक्ष्मीं ...	२	
तीर्णोऽर्णवः कवलितेव	३	
त्वयि त्रिभुवनाधीशे हन्ति ...	१२	४२
:स्खलितयडमर	१२	४५
न दोषः स्वल्पोऽपि प्रभवति	१०	३२
पायात्स वः कुमुदकुन्द.	१	१
पारावतैः किमयमम्बु	१०	३४
पितर्युपरते यस्तु नोद्वहे ...	७	२३
पिता ते यद्बाली वलिनि ..	३	७

	पृ०	श्लो०
बाणैर्लाञ्छितकेतुयष्टिशिखरो	१४	५१
बिभ्राण दशवक्त्रता क्रमसिल...	१३	४८
मनुष्यौ न मनुष्यौ तौ ..	६	१९
मयि रावणङ्कपङ्कजविलासह ...	९	२९
यदाखण्डलदर्पेन्दुराहवो ...	५	१४
यद्वक्त्राणां दशानामिव दश ..	१३	४६
यावल्ललाटशिखरं भ्रुकुटि ...	३	६
रक्षोदुर्भिक्षमाधातुमवतीर्णो .	७	२४
रणरसिकसुरस्त्रीमुक्तमन्दार ..	१४	५३
राम. किं कुरुते	८	२६
रे नक्तंचरराज मुञ्च सहसा	११	३७
रे राक्षसाः कथयत क्व स ..	७	२१
रे रे राक्षस मा स्म शंकरवर	११	४०
रे रे रावण रावणा. कति बहू	७	२२
वपुर्मुख्य वित्तं व्ययितमिह ...	१४	५०
वानरैर्यदि वध्याः स्मस्त्वयि	१२	४३
विलसिदसरोसवानरवरूहिणी	५	१६
शंभो. कोदण्डभङ्गादवि ...	१	२
शिरोभिर्मा देवी. शिव इव न	११	३८
श्रुत्वा रघुपतेः किंचिदनिष्टं ...	९	३१
स एष जगदास्कन्दकौतुकी...	७	२०
संधो वा विग्रहे वापि मयि. .	४	१०
संनह्यतां सपदि राक्षसवीर ...	१२	४४
समं प्रतिज्ञया येन तीर्त्वा ..	१०	३३
सर्वा गीर्वाणवध्वो व्रजत निजगृ	१४	५२
सावज्ञमिव संपश्यन्कपिवीर..	४	११
स्वनिर्मित किंचन गद्यपद्यबन्धं	१५	५६
तचण्डहेमहरिणैर्वा	१३	४७

ACT I.

[1] (*Induction.—Invocation.*)

May Śiva's trump bring safety unto you,
All white with jasmine and with lotuses,
Whereon the moon hath his abiding-place,
And whose dread call doth loose the zones which deck
The brides of them that war against the gods.

And, further,

How wondrous would great Rāma's nature seem
Did all men know that he is Viṣṇu's self,[1]
And that he ever worketh for their weal;
He brake Śiv's bow,[2] and yet was not revealed,
Slew Śakra's son,[3] and still was unperceived,
He built the bridge,[4] nor then was recognized;
E'en from the conference of Aṅgada[5]
His ways remain untraced by mortals still,
For that he hath assumed the form of man.

(End of the invocation.)

(Enter the *Stage-Manager,* looking toward the wings.)

Stage-Manager. Dear Vilāsavatī, hither now!

[2] (Enter an *Actress.*)

Actress. Here I am, husband. May my lord tell what is to be done!

Stage-Manager. At the command of the council of the great king, the sovereign lord, the glorious Tribhuvanapāladeva,[6] a boar[7] for the support and the like of the burden of all the earth, a royal swan of majesty swimming in the flood of the many tears fallen from the blue lotus eyes of the wives of whole hosts of enemies cloven by his own hands,

---

[1] Rāma was one of the avatars, or incarnations, of Viṣṇu.

[2] The bow given by Śiva to Janaka, but bent and broken by Rāma, who thus won his bride Sītā (see *Rāmāyaṇa* i, 67).

[3] Vāli, the brother of Sugrīva and father of Aṅgada (*Rāmāyaṇa* iv, 16—22).

[4] The modern Adam's Bridge between India and Ceylon.

[5] The *bīja,* or allusion to the subject-matter of the entire drama (cf. Lévi, *Théatre indien,* 34).

[6] A Chaulukya monarch of Aṇhilvāḍ, who ruled for a year in Gujarat (1242—1243; see *Introduction*).

[7] In other words, a quasi-Viṣṇu (alluding to this god's third or boar-incarnation), and consequently a quasi-Rāma.

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

I have undertaken a pre-eminent production. What ho! ye members of the audience! hear ye attentively that to-day, at the festival of spring,[1] at the procession of the divine and glorious Kumārapāladeva,[2] a shadow-play[3] is to be presented called *The Messenger Aṅgada*, composed by a great poet, the glorious Subhaṭa, thoroughly versed in knowledge of word and phrase.

Actress. The undertaking is excellent, husband!

Voice (within).

Upon Suvela's[4] heights doth Rāma sport,
Who crossed the sea and slew the simian king,[5]
Conferring all his realm on Tārā's spouse.[6]

Stage-Manager. My dear, the actors have begun, for here are heard the conversations of the heroes attendant upon Rāma. Come, then! Let us both be ready for what must straightway be done!

(Exeunt.)

(End of the Induction.)

(Enter *Rāma* and *Lakṣmaṇa*, sitting on a rock in the hills of Suvela. *Sugrīva* and others in order of rank as a retinue.)[7]

Rāma (to *Lakṣmaṇa*). Good Lakṣmaṇa,

[3] The ocean's passed, and now the monkey-host
Hath swallowed up the demon-capitol;
While I that speak have played the man to-day,
Aided by Fate, or by yon mighty bow.

Lakṣmaṇa. Noble sir, what advantage is there in a fate subject to a coward's soul?

Unto the man of deeds fair Fortune comes;
'Tis only cowards moan that 'Fate is Fate':

---

[1] *Vasantotsava*, 'formerly held on the full-moon day of Chaitra [March-April], but now on the full-moon day of Phālguna [February-March], and identified with the *Holi* festival' (Apte, *Sanskrit-English Dictionary*, s. v.). See also *Introduction*.

[2] A Chaulukya monarch of Tribhuvanapāla's dynasty, who ruled from 1143 to 1172 (see *Introduction*).

[3] On the signification of this term, see *Introduction*.

[4] One of the peaks of the mountain Trikūṭa, on whose central height Rāvaṇa's capital was situated.

[5] Vāli.

[6] Sugrīva, who, after Vāli's death, married Tārā, his brother's widow.

[7] The first scene, which begins here, is based on *Rāmāyaṇa*, vi, *41*, 58—73.

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

Slay thou thy fate, and strive as heroes strive;
If then thou fall, not thine the dark disgrace.[1]

And, furthermore,

While half thy brow alone be dark with frowns,
And while thy bow remaineth still unstrung,
Let him who ruleth o'er the fiends of night[2]
Bend low the roots of all the triple world,
And wax unceasing in his arrogance.

Therefore let Aṅgada be told his message.

Rāma (looking at *Aṅgada* respectfully). Good friend,
All words are dumb to tell thy father's deeds
Against that mighty fiend whose necks are ten,[2]
And yet this flesh our wonder doth reveal;[3]
But thou thyself, in reverence to thy sire,
Curtailest thine own prowess! Do not so!
Up! prove thee worthy of our trust in thee!

Aṅgada (bowing with both hands touching the circle of his head, speaks).
What message shall I bear to Laṅkā's[4] gates?
Or shall I there raise mighty hosts for thee?
[4] Or ring the ocean through eternity
With all the lofty mountains of the world?
Tell me, O, King! what thou wouldst have me do,
And what the tasks that wait my sturdy arm!

Rāma. Friend,
Swift haste thee now, and unto Rāvaṇ say:[5]

---

[1] A verse borrowed from the *Pañcatantra* (ed. Kielhorn and Bühler, i, 361; ii, 130) or from the *Hitopadeśa* (ed. Peterson, i, 22), and repeated in Sanskrit anthologies (see Böhtlingk, *Indische Sprüche*, 1255). Durgāprasāda and Parab note that it is omitted in some manuscripts of the *Dūtāṅgada*.

[2] Rāvaṇa.

[3] Of course an allusion to the familiar 'horripilation' constantly mentioned in Sanskrit literature. The reference to Vāli's deeds of prowess against Rāvaṇa seems to be a mere compliment of Rāma to Aṅgada, unless one may infer from the fact that both Rāvaṇa and Vāli ruled in Laṅkā that there was hostility between them, so that Aṅgada, in a measure, inherited his father's feud.

[4] Usually identified with Ceylon, although this is doubted by Jacobi (*Das Rāmāyaṇa*, 90—93), at least so far as the oldest portions of the Rāma-cycle are concerned.

[5] Comp. the message given Aṅgada for Rāvaṇa by Rāma in *Rāmāyaṇa* vi, 41, 61—72. The Bombay editors note that Kṣemendra, who flourished in the eleventh century (Aufrecht, *Catalogus Catalogorum*, i,

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

'Unwitting, or by kingly lust inflamed,
Thou stolest Sītā whilst I was afar;
Restore her unto me, or with thy sons
In Death's grim city thou shalt dwell ere long,
Thy royal parasol the crimson blood
Welling from wounds that Lakṣmaṇ's arrows deal.'

Aṅgada. Sire,
If I be messenger in peace or war,
Full soon the spouse of mighty Rāvaṇa
Shall fall, whether her fate be life or death.

Rāma. Good, O, son of Vāli, good! (So saying, laying his hand on his back, he dismisses him. Exit *Aṅgada*, bowing.)

Sugrīva (gazing at the summit of the rocks of Laṅkā). Look, sire, look!
Like to a tusker mad with must, the fiend
Doth gaze in deep disdain, as if he felt
The host of simian heroes captive made
And on his shoulder borne unto their doom.
Come then! Let us gaze upon the shores of the sea, adorned by the forests on Suvela's cliffs.

(Exeunt.)

(Enter *Rāvaṇa, Mandodarī*, and *Vibhīṣaṇa* and others as retinue.)[1]

Rāvaṇa (to *Vibhīṣaṇa*). Friend Vibhīṣaṇa,
Am I not Rāvaṇ, Laṅkā's lord, and these
The hands that cure great Indra's itching arms?[2]
[5] I hear that Rāma bridgeth ocean o'er
And see the monkey-hosts invade mine isle,
E'en though no sound is heard, and naught is seen.[3]
And, furthermore,
How comes it that this wanderer ne'er hath heard
Of my grim blade, that with resistless might
Could cleave the temples of Airāvata,[4]
And that men name 'The Laughter of the Moon'?[5]

---

135), ascribes this verse, with minor variations, in his *Suvṛttatilaka* (ii, 37 of the *Kāvyamālā* edition) to Bhavabhūti.

[1] The second scene, which begins here, is based on *Rāmāyaṇa*, vi, 41, 74—90.

[2] An allusion to the defeat of Indra by Rāvaṇa and his son Indrajit or Meghanāda (*Rāmāyaṇa* vii, 27—29).

[3] Thus indicating his supernatural power.

[4] The elephant of the god Indra.

[5] *Candrahāsa*, the sword bestowed on Rāvaṇa by Śiva (*Rāmāyaṇa* vii, 16).

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

But lo, he findeth Laṅkā's shores all bare
Of Meghanāda and his comrades bold,
Wherefore his death-doomed soul now wavereth.

Mine arms eclipse the moon of Indra's pride,
And unto holy hermits work dire woe.
Oh, portent dread of evil yet to come!

Mandodarī (aside).

Even to-day envenomed arrogance
Pours from his throat as rain to wake the buds
Upon the tree of doom to all his kin!
(Aloud.) Look, husband, look! Wonderful, wonderful!
The surging cries of wrathful monkeys ring
Within thy house of dalliance, my lord!

Rāvaṇa (contemptuously). O, queen, sweet is thy speech by nature, but enough, enough of this terror at the sound of these wretched apes! What further wouldst thou say?

Mandodarī.

Still, still thou may'st escape! give Sītā back
To Rāma's arms! I pray thee, hear my plea!

[6] ***Rāvaṇa*** (with an angry laugh). My queen,
It may not be, since she by force was stolen
And was not given back to him straightway;
But lo, to-day the surging sea is bound,
And must I sue for peace by yielding her?
Therefore leave thou this pleasure-house. (Exit ***Mandodarī***, weeping.)

Rāvaṇa (to ***Vibhīṣaṇa***). Friend Vibhīṣaṇa, what speech is thine?

Vibhīṣaṇa. Sire, lord of Laṅkā, consider well!
They twain be more than men, and these great apes
Be more than members of the monkey-folk;
Behind their guise lurks awful mystery
Pregnant with woe for Laṅkā's mighty king.
Therefore set Sītā free, a night of doom for the race of Rākṣasas!

Rāvaṇa (angrily drawing his sword). Ah! knave, adherent of mine enemy, brand of thy family, and scoundrel! with Candahāsa shall I make thy head to fall! (Seizes him; ***Vibhīṣaṇa*** flees in terror.)

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

Mālyavān [1] (standing between them). Sire, lord of Laṅkā! consider well whether evil hath been spoken by prince Vibhīṣaṇa.

Rāvaṇa. Ha! Art thou, too, like to him? (***Mālyavān,*** in terror, stands silent.)

Rāvaṇa (to *Vibhīṣaṇa*). Thou cursed kinsman! leave my capital, join that hermit,[2] and make thy skill in ethics known! I will not slay thee again![3]

Vibhīṣaṇa. What needs must hap doth not happen otherwise!

(Exit. Enter a porter named *Prahasta.*)

Prahasta. Sire, at the door stands a monkey, saying: 'I am Rāma's envoy.'[4]

[7] ***Rāvaṇa*** (contemptuously). Let him enter then!

[7] (Enter *Aṅgada* with *Prahasta.*)

Aṅgada (looking at ***Rāvaṇa,*** aside).

'Tis Rāvaṇa, that fain would wreck the world!
But in his groves shall Rāma launch his darts!

(Aloud.)

Ye Rākṣasas, where stands curst Rāvaṇa
Who stole the gem that decks the moon and sun?
He is a moth doomed unto Rāma's flame,
That fills the threefold world with radiance.

(Several ***Rākṣasas*** assume the form of ***Rāvaṇa.***)

How many Rāvaṇs art thou, O thou fiend?
In sooth we heard that thou wert multiform;
The one subdued by Kārtavīrya's arm[5];
Another given as food to dancers vile
By wanton slave-girls of the Daitya lord;
And to a third 'tis direst shame to speak;
Who art thou, if thou art not one of these?

Rāvaṇa (assuming various forms, insultingly). Who art thou, ape? Whose messenger art thou?

---

[1] Though no 'enter' is given this character, he was doubtless included among the retinue surrounding Rāvaṇa at the beginning of the scene.

[2] Rāma, in allusion to his exile from his native land.

[3] Vibhīṣaṇa, if struck by Rāvaṇa once, would never live to receive a second blow.

[4] Comp. ***Mahāvīracarita*** vi (Pickford's translation, 131—133).

[5] See ***Viṣṇupurāṇa*** iv, 11. The allusion to the 'Daitya lord' (apparently either Bali or Pātālaketu) is obscure.

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

Aṅgada.

The son who shirks the deeds his father did
Could scarce instruct the elders of his house.[1]

So be it, then,

Yet one hath come to earth to bear the woe
By demons wrought through all this mortal world;
And I, his envoy, stand before thee now,
Great Rāma's messenger, and Vāli's son.

And, furthermore,

I am the messenger of mighty Rām
That slew my sire, whose valor thou dost know.

[8] *Rāvaṇa* (to *Aṅgada*).

What doeth Rāma?

Aṅgada. Naught.

Rāvaṇa. And yet but now
He cometh unto ocean's shore!

Aṅgada. 'Tis naught!

Rāvaṇa. Why hath he bound the sea?

Aṅgada. For kingly sport!

Rāvaṇa. Doth he not know that Rāvaṇ shieldeth it?

Aṅgada. Vibhīṣaṇa, thy brother, knows it well,
Who stands by Rāma's side on Laṅkā's soil.

Rāvaṇa (in alarm). What now is Rāma's course?

Aṅgada. Upon his lap he takes Sugrīva's head,
Yea, and the foot of him who Akṣa slew,[2]
Then on a golden deer-skin soft reclines;
And glanceth at the arrow keen and straight
By Lakṣmaṇ made to slay the demon-host,
The while he hearkens to thy brother's words.

(*Rāvaṇa*, gesticulating contempt, speaks thus and thus in the ear of *Prahasta.*)

Prahasta. As my lord commands.

(Exit *Prahasta*; enter a *False Maithilī*[3] with *Prahasta.*)

False Maithilī. Victory, victory, my spouse! (Thus speaking, she climbs to the lap of *Rāvaṇa.*)

Rāvaṇa (aside). Good, good, even though false! thou knowest how to please him of ten necks![4]

---

[1] Probably meaning that if he fails, none will heed his words.

[2] Akṣa, the eldest son of Rāvaṇa, was slain by Hanumān (*Rāmāyaṇa* v, 47).

[3] Maithilī is only a synonym for Sītā. [4] Rāvaṇa.

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

[9] *Aṅgada* (aside, in sorrow). Would even Janaka's daughter go the way of her who takes gain from a stranger? So be it! Let me consider now!

Rāvaṇa. Lady daughter of Videha, answer thou this monkey, sent by Rāma!

False Maithilī (looking at *Aṅgada* respectfully). Good Aṅgada, answer thou the son of Raghu in my words:

'O, Rāma, wherefore doth this cause thee woe?
Swift get thee home, for of mine own accord
And publicly I wedded this my lord.

Yea, more than this,

Like to a swan in Rāvaṇ's lotus-lap
I sport the live-long day; so get thee hence
Unto thy realm where Bharata lies dead
Within a land by demons devastate.'[1]

Aṅgada (stopping his ears). Nay, lady daughter of Janaka!

Such words of shame fair Sītā never speaks,
For spotless purity adorns her soul,
And like the Ganges she doth cleanse the world.

(Enter, with a toss of the curtain,[2] a *Rākṣasī.*)

Rākṣasī. Tidings of ill hath Rāma's captive spouse
Heard of her lord, and fain would end her days
Upon a slender cord of tendrils wove.

Rāvaṇa (in distress). Ah! Ill words and at a time unseemly! Rākṣasas, protect, protect the daughter of Janaka!

(Dismisses the *False Maithilī.*)

Aṅgada (joyfully). Through the glory of the true Maithilī the blackness of the false Maithilī is hid!

[10] *Rāvaṇa.* What wouldst thou say, thou wrinkle-face?

Aṅgada. Disgrace comes not to thee from evil deeds,
Wherein thy hellish race its glory finds;
'Tis natural thou should'st steal another's wife
And think our warriors' wrath unjust to thee.

Rāvaṇa (angrily). Thou knave of evil face! through the sight of thy calumny thou deservest nevermore the sight of Raghu's son![3]

---

[1] A false statement to make Rāma retire from Laṅkā.

[2] In token of hasty entrance.

[3] Rāma.

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

Aṅgada. Nay, consider thou another tale;
Rāma hath passed the sea impassible,
Fulfilling his great vow, and portions out
Suvela's forests as thy many arms.[1]

Rāvaṇa. Thou fool in understanding!
The ocean is not crossed by simian hosts,
Or they would swarm on every mountain-peak,
Unless, forsooth, they lurk in coverts hid;
But on the touchstone of the sword to-day
Will I put Rāma's valor to the proof.
Nay, more than this, thou knowest not Rāvaṇa!
With Candrahāsa oftimes I have gone
To fell the forest of the foemen's throats,
And lo, the bursting veins wept tears of blood,
And choking sobs were hushed by Death's chill hand;
Lord Śiva beareth witness to my words.[2]

Aṅgada. Nay, what hath Rām to do with thy keen glaive?
Thine arrows end the terror of the world,
And, thanks to them, thou fool, thy severed heads
Shall never rise to lofty majesty
Like to the changing moon on Śiva's brow.

[11] *Rāvaṇa* (angrily drawing *Candrahāsa*). Away! away from me! I shall not slay thee twice!

Aṅgada (anxious to be gone).
Set Sītā free, thou demon of the night!
In vain thou prancest through thy valorous steps;
Before thee standeth all the simian host,
Dread with the might of their immortal king,
And with their prowess hymned by kinnaras.[3]
And, more than this,
He will not give thee wives as Śiva did,[4]
Though many be thy heads, for lo, he makes
The sea a lake, thou soldier of Kailās;[5]
Thou wert my friend when he did slay my sire—

---

[1] Rāvaṇa had twenty arms.

[2] The deity who had given him his sword.

[3] Celestial musicians, dwelling in Kuvera's paradise and having the form of a man with the head of a horse.

[4] An obscure allusion.

[5] An allusion to Rāvaṇa's victory over the semi-divine Yakṣas at Mount Kailāsa, a peak of the Himālayas (*Rāmāyaṇa*, vii, 14—15).

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

O shaken pillar of fame! restore the spouse
Of Rām, the noble kin of lotuses!

Nay, too,

He that lopped off the arms of Tāṭakā,[1]
Yea, marred thy sister's wondrous loveliness,[2]
Destroyed thy soldiers in the forest-glades,
And bindeth now the sea, doth work thy doom;
Yet still to fond delusion thou dost cling.

Yea, furthermore,

Thou foolish fiend! trust not to Śiva's boon,
Since he is wroth with thee for Sītā's sake;
Else he had given back thy sacrifice
When he was girt with skulls that he did break.

Yet, more than this, we know the true nature of thine attachment to the service of the Lord,[3] but thou art proud in vain!

Why dost thou vaunt thyself, Paulastya[4] cruel:
Lo, I that speak brought joy to Śiva's heart
By gifts of his own beauteous lotuses;
[12] But on thee he bestowed thy blade divine
Through merest pity of thy penances,
And in remorse for the fifth head of Brahm,
Which he destroyed in olden days of sin.[5]

Hearken, thou ten-faced fiend! we shrink not in terror of the words which come from the hole within thy face!

(Exit *Aṅgada.*)

Voice (within).

Thou art the sovereign of the threefold world,
And yet the apes of Rāma slay thy hosts!
Swift to the fray! or hath thy valor quailed?

Rāvaṇa (anxiously). Alas! mightily wail our subjects that are being slaughtered!

(Enter *Demon-Warriors* with wounded limbs.)

---

[1] The demonic daughter of Suketu, slain by Rāma (*Rāmāyaṇa* i, 26).

[2] Śūrpaṇakhā, a hideous demoness, became enamoured of Rāma, who bade his brother Lakṣmaṇa cut off her nose and ears (*Rāmāyaṇa* iii, 18).

[3] Śiva.

[4] Rāvaṇa, as being the grandson of the *ṛṣi* Pulastya.

[5] Alluding to the Puranic legend that Śiva pinched off the fifth head of Brahma.

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

Demons.

'Tis shame for us to die at simian hands!
If thou be lord, make not thy wisdom vain
While thou dost live and breathe in Laṅkā's isle.

Rāvaṇa (angrily calling *Prahasta* in haste).

Arm swift my mighty demons for the fray!
What be these apes in cursed Rāma's host?
Lo, in my hand doth Candrahāsa wake,
Grim 'Laughter of the Moon' to mourning brides
Of the immortals falling 'neath its blade.

(Again striding about terribly.) To-day the world will be without Rāvaṇa or without Rāma! (Exit.)

(Enter *Hemāṅgada* and *Citrāṅgada*, two *Gandharvas*[1] wandering in the path of sky).[2]

Hemāṅgada. Good Citrāṅgada,
With arms divine that cried 'Earth, Ether, Sky!'[3]
Great Rāma severed Rāvaṇa's ten heads,
Whilst an eleventh sun shone through the clouds;
And by Kakutstha's wondrous scion slain,[4]
Yea, killed by his swift dart that Brahma sped,
The lord of demons of the night doth lie
A headless thing upon a hero's couch.

[13] *Citrāṅgada.* Good friend, long have we travelled fearlessly by this path of sky!

(Loud noise within.)

Crushed is the might of Rāvaṇ, Laṅkā's king,
He whose ten heads were made to rule the world,
Whose twenty arms gave him a strength tenfold;
Yet slain upon the field by Sītā's spouse
With crescent arrows radiant and keen.

Celestial Bard.

Hearken, Hemāṅgada! look, Citrāṅgada, as on a picture!
With arrows tawny as great Caṇḍa's[5] gold

---

[1] Celestial bards.

[2] The third scene, which begins here, is based on *Rāmāyaṇa* vi, 107—108. Comp. also the last scene of the sixth act of the *Mahāvīracarita* (Pickford's translation, 135—148).

[3] *Bhur, bhuvaḥ, svaḥ*, a cry of mystic power as early as the Yajur Veda.

[4] Kakutstha, king of Ayodhyā, was the father of Raghu, and thus an ancestor of Rāma.

[5] A demon slain by Durgā.

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

All demons save Vibhīṣaṇa are slain
And set by Rāma in his precious store
Of boons to aid him through the lives to come;
Yet in their fear of Yama's conqueror[1]
The timid gods shower no garlands down,
Nor dare to sound the drums of victory.

Citrāṅgada (to *Hemāṅgada,* wonderingly). Good Hemāṅgada, this victor over the rangers of the night and this diadem of heroes is this marvellous vessel of the sentiment of wonder, glorious through his love for the spouse of Bhavānī,[2] before whom all gods and demons bow through the might of his exceeding majesty. But he who, in ages past, in his devotion to the foe of cities,

Paid ten-faced worship unto Śiva's bride,
Who thought the world, yea, and its Lord,[3] his own,
And fain would lay his hands on Brahm's five heads,
Doth roam no more on Durgā's mountain-heights.[4]

(Beholding the might of *karma,* anxiously.)

Look, Hemāṅgada, look!
What vengeance dread for ancient deeds of sin!
Great Śiva, see! the heads that once were thine[5]
Are now defiled by loathsome birds of prey!

Hemāṅgada. Is not this exceeding clear, my friend? 'Where justice is, is victory', is a true saying of the text-books.[6] Therefore in this very instance is revealed the future of those who work good or evil by their bodies and the like. There Rāvaṇa himself forms an example, for

[14] Lo, on this earth thy body is but wealth
To win thee everlasting righteousness,
And when 'tis gone it cometh nevermore;
So Rāvaṇ gave his heads and worlds threefold
To Brahma for a wondrous lotus blue.[7]

---

[1] In allusion to Rāvaṇa's victory over Yama, the god of death (*Rāmāyaṇa* vii, 20—22).

[2] The husband of Bhavānī (Pārvatī) is Śiva.

[3] Śiva.

[4] The Himālayas, which include the Mount Kailāsa already mentioned.

[5] An obscure allusion.

[6] The same proverb occurs in the *Dharmaviveka* and the *Prasaṅgabhāraṇa* (*Indische Sprüche* 2348, 5030).

[7] See *Rāmāyaṇa* vii, 10.

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

Voice (within).

Its banner-pole all gashed with Rāma's darts,
Its charioteer a-faint in streams of blood,
The carrion vultures hovering o'er its path,
And with its axle broken 'neath the fall
Of Rāvaṇ's headless corpse, his car now comes
To Laṅkā, swiftly drawn by whinneying steeds
That would return to their remembered stalls.

(Again within.)

Come from your homes, ye brides of gods immortal,
And thou, mahout of our dread deities,
Fast tie thy mighty elephant divine;
Go forth, ye gods, as watchmen of the night,
And brighter, sweeter far be now the bloom
Of coral trees in Indra's holy grove;
For at the eastern gate lies Rāvaṇ's head,
Defiled and branded by the hands of slaves.

And, more than this,

Girt round with fragrance showered from the hands
Of brides divine rejoicing in the fray,
Himself descended from his car of war,
And with his hand resting on Lakṣmaṇa,
His ears filled with the cry of 'victory'
Torn from the prisoners' reluctant lips,
Doth Rāma, Sītā's mighty spouse, draw nigh!

Rāma (crowned with flowers, going to Ayodhya,[1] to *Sītā*, pointing out the battle-field of Laṅkā).

Here Phaṇipāś yielded to Lakṣmaṇ's might,
There, rent and torn, Droṇādri once became
The captive of divinest Hanumān;
Here by my brother Indrajit was slain,
And there did one[2] whose name I may not tell
Hew Rāvaṇ's heads from his accursed frame,
Like some unholy wood, sweet Eyes 'o Fawn![3]

Joying the heart of Sītā with such words,
Whose sentiment is new to mortal ears,

---

[1] The modern Oudh.

[2] Rāma himself.

[3] Comp. with this speech *Rāmāyaṇa* vi, 123, 3—15, and the last act of the *Mahāvīracarita.*

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms

His limbs a-thrill with beauty and delight,
[15] Let Rāma haste unto his capital;
And there rule o'er his land forevermore—
Guarding his realm and loyal citizens,
Whom he shall bless with bounties manifold.

By Subhaṭa this drama hath been writ
Upon a theme dear to the bards of old,
And to it he hath added his own words,
Commingling prose and verse in flavor sweet.

This content downloaded from 42.106.53.155 on Mon, 20 Nov 2017 13:23:56 UTC
All use subject to http://about.jstor.org/terms